श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे षोडशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे षोडशोऽध्यायः ॥

राजोवाच
उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्य -
स्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा
सह दृश्यते ॥ 1 ॥

तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः
सप्त सिन्धव उपक्लृप्ता यत एतस्याः सप्तद्वीप -
विशेषविकल्पस्त्वया भगवन् खलु सूचित
एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं
विजिज्ञासामि ॥ 2 ॥

भगवतो गुणमये स्थूलरूप आवेशितं मनो
ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे
ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं
तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ 3 ॥

ऋषिरुवाच
न वै महाराज भगवतो मायागुणविभूतेः
काष्ठां मनसा वचसा वाधिगन्तुमलं
विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव

भूगोलकविशेषं नामरूपमानलक्षणतो
व्याख्यास्यामः ॥ 4 ॥

यो वायं द्वीपः कुवलयकमलकोशाभ्यन्तर -
कोशो नियुतयोजनविशालः समवर्तुलो
यथा पुष्करपत्रम् ॥ 5 ॥

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामा -
न्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥ 6 ॥

एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य
नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो
मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलय -
कमलस्य मूर्धनि द्वात्रिंशत् सहस्रयोजनविततो
मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥ 7 ॥

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति
त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः
प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव
एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो
दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥ 8 ॥

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय
इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा
हरिवर्षकिम्पुरुषभारतानां यथासङ्ख्यम् ॥ 9 ॥

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादना -
वानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमाल -
भद्राश्वयोः सीमानं विदधाते ॥ 10 ॥

मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजन -
विस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय
उपक्लृप्ताः ॥ **11** ॥

चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः
पादपप्रवराः पर्वतकेतव इवाधिसहस्र -
योजनोन्नाहास्तावद् विटपविततयः
शतयोजनपरिणाहाः ॥ **12** ॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला
यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि
स्वाभाविकानि भरतर्षभ धारयन्ति ॥ **13** ॥

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं
वैभ्राजकं सर्वतोभद्रमिति ॥ **14** ॥

येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय
उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ **15** ॥

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूत -
शिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि
पतन्ति ॥ **16** ॥

तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धि -
बहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरि -
शिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥ **17** ॥

यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूना -
मवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनु -
वासयति ॥ **18** ॥

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थि -
प्रायाणामिभकायनिभानां रसेन जम्बू नाम नदी
मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती
दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥ 19 ॥

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानु -
विध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोका -
भरणं जाम्बूनदं नाम सुवर्णं भवति ॥ 20 ॥

यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटक -
कटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥ 21 ॥

यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य
कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः
पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्यो -
ऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥ 22 ॥

या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ता -
च्छतयोजनमनुवासयति ॥ 23 ॥

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य
स्कन्धेभ्यो नीचीनाः पयोदधि मधुघृतगुडान्ना -
द्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः
कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुप -
योजयन्ति ॥ 24 ॥

यानुपजुषाणानां न कदाचिदपि प्रजानां
वलीपलितक्लमस्वेददौर्गन्ध्यजरामय -
मृत्युशीतोष्णवैवर्ण्योपसर्गादयस्ताप -
विशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥ 25 ॥

कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्ग -
रुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधि -
हंसर्षभनागकालञ्जरनारदादयो विंशतिगिरयो
मेरोः कर्णिकाया इव केसरभूता मूलदेशे
परित उपक्लृप्ताः ॥ **26** ॥

जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्र -
मुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः।
एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ
प्रागायतावेवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः
परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥ **27** ॥

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां
पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं
वदन्ति ॥ **28** ॥

तामनु परितो लोकपालानामष्टानां यथादिशं
यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥ **29** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भुवनकोशवर्णनं नाम षोडशोऽध्यायः ॥